त्रिकाणि ओजःशोषणपूर्व्वकं सन्धिबन्धशिथिली करणशीलम्। आग्नेयं अधिकाम्लरसम्। योगवाहि संसर्गगुणग्राहकम्। मदावहं तमोगुणाधिक्येन बुद्धिविध्वंसकम्।
"तदेव युक्तियुक्तं तु प्राणदायि रसायनम्।
योगवाहि त्रिदोषघ्नं वृंहणं वीर्य्यवर्द्धनम्॥
ये दुर्गुणा विषेऽशुद्धे ते स्युर्हीना विशोधनात्।
तस्माद्विषं प्रयोगेषु शोधयित्वा प्रयोजयेत्॥"
इति भावप्रकाशः॥
(क्लीवेऽपि दृश्यते। यथा,—
"चत्वारि वत्सनाभानि मुस्तके द्वे प्रकीर्त्तिते।"
"ग्रीवास्तम्भो वत्सनाभे पीतविण्मूत्रनेत्रता॥"
इति सुश्रुते कल्पस्थाने द्वितीयेऽध्याये॥)
वत्सपत्तनं, क्ली, (वत्सस्य वत्सराजस्य पत्तनम्।) भारतवर्षस्योत्तरे देशविशेषः। तत्पर्य्यायः। कौशाम्बी २। इति हेमचन्द्रः। ४। ४१॥
वत्सपालः, पुं, (वत्सान् पालयतीति। वत्स+पालि+अण्) श्रीकृष्णः। बलदेवः। यथा,—
"वृन्दावनं गोवर्द्धनं यमुनापुलिनानि च।
वीक्ष्यासीदुत्तमा प्रीती राममाधवयोर्नृप॥
एवं व्रजौकसां प्रीतिं यच्छन्तौ बालचेष्टितैः।
कलवाक्यैः स्वकालेन वत्सपालौ बभूवतुः॥"
इति श्रीभागवते। १०। ११। ३६॥
(वत्सपालके, त्रि। यथा, हरिवंशे। ६७।२४।
"स तत्र वयसा तुल्यैर्वत्सपालैः सहानघः।
रेमे वै दिवसं कृष्णः पुरा स्वर्गगतो यथा॥")
वत्सरः, पुं, (वसन्त्यस्मिन् अयनर्त्तुमासपक्षवारादय इति। वस निवासे+"वसेश्च।" उणा० ३। ७१। इति सरन्। "सः स्यार्द्धधातुके।" ७। ४। ४६। इति सस्य तः।) द्वादशमासात्मककालः। अयनद्वयात्मकश्च। तत्पर्य्यायः। संवत्सरः २ अब्दः ३ हायनः ४ शरत् ५ समा ६। इत्यमरः। १। ४। २०॥ शरदा ७ वर्षम् ८ वरिषम् ९ संवत् १०। इति शब्दरत्नावली॥*॥
"व्रतबन्धविवाहे च वत्सरपरिकल्पनमाहुराचार्य्याः।
आधानपूर्व्वमेके प्रसूतिपूर्व्वं सदान्ये तु॥"
सौरसावननाक्षत्रचान्द्रभेदेन चतुर्व्विधो वत्सरः। यथा चूडोपनयनादिषु वर्षगणना सावनेन शुभाशुभगणनन्तु सौरेणेति सिद्धम्। सावनसंवत्सरेण एकदिनाधिकवत्सरो नाक्षत्रो भवतीत्यनयोर्भेदः। सौरस्तु पञ्चषष्ठ्यधिकत्रिशतदिनैर्भवति। यथा,—
"मेषादीनामहर्वृन्दं वस्वाशक्षपाचन्द्रकम्॥१८७॥
तुलादीनामष्टसप्तचन्द्रकन्तु लिखेत्ततः॥"१७८॥
चान्द्रवत्सरोऽपि द्वादशमासैर्भवति। मलमासपाते तु त्रयोदशमासैर्भवति। तथा च श्रुतिः। द्वादशमासाः संवत्सरः क्वचित्त्रयोदशमासाः संवत्सर इति। त्रयोदशेत्यधिमासे। स्मृतिः। यस्मिन्नब्दे द्वादशैकश्च यत्र इति। यत्रो मास इति। यत्रा मासाः स्वमेकः संवत्सर इति श्रवणश्रुत्या यत्र-स्वमेक-शब्दयोर्मासवर्षपर्य्यायतोक्ता। इति मलमासतत्त्वम्॥*॥ अथ षष्टिसंवत्सरगणना।
"शकेन्द्रकालः पृथगाकृति-२२ घ्नः
शशाङ्कनन्दाश्वियुगैः ४२९१ समेतः।
शराद्रिवस्विन्दु-१८७५ हृतः सलब्धः
षष्ट्यावशिष्टाः प्रभवादयोऽब्दाः॥
वर्षवर्जन्तु यच्छेषं हृत्यैः संपूर्य्य खोर्म्मिभिः॥६०॥
हृतयुत्क्रमतः स्वाग्निहृतेऽंशे मासकादयः॥"
अस्यार्थः शकेन्द्रकालः शकराजाब्दकालः। पृथक् आकृतिघ्नः २२ द्वाविंशत्या पूरितः। शशाङ्कनन्दाश्वियुगैरेकनवत्यधिकशतद्वयाधिकचतुःसहस्रैः समेतोऽङ्कः। शराद्रिवस्विन्दुहृतः पञ्चसप्तत्यधिकाष्टादशशतैर्यावत्संख्यं हर्त्तुं शक्नोति तावता हृतः कर्त्तव्यः। सलब्धः पूर्व्वशकाब्दः शरेत्यादिना लब्धसंख्यया युतः कार्य्यः। षष्ट्याऽवशेषे यच्छेषोऽङ्कः पूर्व्ववत् षष्ट्याहृतलब्धस्यावशिष्टे प्रभवादयः। एकावशेषे प्रभवः द्व्यवशिष्टे विभवादिः। वर्षवर्जन्तु यच्छेषं वर्षातिरिक्तं शराद्रिवस्विन्दुहृतावशिष्टं तत् हृत्यैर्द्वादशभिः संपूर्य्य खोर्म्मिभिः षष्ट्या हृते युत्क्रमत इत्यनेन षष्टिहृतावशिष्टा अङ्का दण्डाः षष्टिहृतलब्धांशके स्वाग्निहृते त्रिंशता हृतेऽवशिष्टा अंशकाः लब्धा मासाः स्युरिति। प्रभवादिवर्षाण्युपक्रम्य।
"आद्या तु विंशतिर्ब्राह्मी द्वितीया वैष्णवी स्मृता।
तृतीया रुद्रदैवत्या श्रेष्ठा मध्याधमा भवेत्॥"
भविष्यपुराणे।
भैरव उवाच।
"षष्ट्यब्दं कथयाम्यत्र क्रूराः सौम्याश्च ये प्रिये!।
संवत्सरफलं सम्यं प्रभवादौ वरानने!॥
बहुतोयास्तथा मेघा बहुशस्या च मेदिनी।
बहुक्षीरास्तथा गावो व्याधिरोगविवर्ज्जिताः॥
प्रशान्ताः पार्थिवाश्चैव प्रभवे परिकीर्त्तिताः॥१॥
सुभिक्षं क्षेममारोग्यं सर्व्वे व्याधिविवर्ज्जिताः॥
प्रशान्ता मानवास्तत्र बहुशस्या वसुन्धरा।
हृष्टास्तुष्टा जनाः सर्व्वे विभवे च वरानने!॥२॥
रोगा बहुविधाश्चैव मनुष्या वाजिकुञ्जराः।
सर्व्व एव प्रणश्यन्ति शुक्ले वर्षे वरानने!॥३॥
उन्मत्तञ्च जगत् सर्व्वं धनधान्यसमाकुलम्।
नित्योत्सवः प्रजावृद्धिः प्रमोदे जायते प्रिये॥४॥
नीरोगाश्च निराबाधा मानवा विगतद्विषः।
बहुक्षीरास्तथा गावः प्राजापत्ये वरानने॥५॥
निरातङ्कं जगत् सर्व्वं धनयौवनगर्व्वितम्।
अङ्गिरसि प्रजाः सर्व्वा नित्योत्साहा वरानने॥६॥
सुभिक्षं क्षेममारोग्यं वर्षाकालं सुशोभनम्।
शस्यवृद्धिं विजानीयात् श्रीमुखे सुरवन्दिते॥७॥
बहुक्षीरास्तथा गावो धान्यञ्च बलवत्तरम्।
जायन्ते सर्व्वशस्यानि भावे वर्षे वरानने॥८॥
महार्घं जायते सर्व्वं घृततैलरसादिकम्।
प्रजानाञ्च भवेद्वृद्धिर्यु्वनि संवत्सरे शुभे॥९॥
निष्पत्तिः सर्व्वशस्यानां मध्या धातरि कीर्त्तिता।
इक्षुक्षीरगुड़ादीनां प्रबलत्वं वरानने॥१०॥
सुभिक्षं क्षेममारोग्यं कार्पासस्य महार्घता।
लवणं मधु गव्यञ्च ईश्वरे दुर्लभं प्रिये॥११॥
सुभिक्षं क्षेममारोग्यं प्रशान्ताः पार्थिवाः प्रिये।
तस्करोपहृतं वित्तं बहुधान्ये वरानने॥१२॥
राष्ट्रभङ्गश्च दुर्भिक्षं तस्करैश्चोपपीड़नम्।
जानीयाद्विग्रहं घोरं प्रमाथिनि वरानने॥१३॥
जायन्ते सर्व्वशस्यानि मेदिनी निरुपद्रवा।
लवणं मधु गव्यञ्च महार्घं विक्रमे प्रिये॥१४॥
कोद्रवाः शालिमुद्गाश्च शक्तुमाषास्तथैव च।
महार्घं जायते सर्व्वं वृषे च सुरवन्दिते॥१५॥
चणका मुद्गमाषाश्च अन्यच्च विदलं प्रिये।
महार्घं जायते सर्व्वं चित्रभानौ वरानने॥१६॥
सुभिक्षं क्षेममारोग्यं विश्वञ्च निरुपद्रवम्।
व्यवहारो भवेत् हृष्टः स्वभानौ देवपूजिते॥१७॥
अतिवृष्टिश्च जायेत धान्यस्याथ प्रपीड़नम्।
शस्यं भवति सामान्यं दारुणे सुरवन्दिते॥१८॥
बहुशस्यानि जायन्ते सर्व्वदेशे सुलोचने।
सौराष्ट्रे लाटदेशे च पार्थिवे नात्र संशयः॥१९॥
दुर्भिक्षं जायते घोरं सर्व्वोपद्रवसंयुतम्।
अनावृष्टिः समाख्याता व्यये संवत्सरे प्रिये॥२०॥
उद्धतो वर्षणे मेघो जलं नैवोपजायते।
महार्घं सर्व्वजिद्वर्षे सर्व्वमेव वरानने॥२१॥
कोद्रवाः शालिमुद्गाश्च कङ्गुमाषास्तथैव च।
सुलभं जायते सस्यं जगद्वै सर्व्वधारिणि॥२२॥
अनग्निप्रबला लोका शान्त्यौषधिप्रपीड़नम्।
जायते मानुषे कष्टं विरोधिनि न संशयः॥२३॥
सर्व्वाः प्रजाः प्रपीड्यन्ते व्याधिः शोकश्च जायते।
शिरोवक्षोऽक्षिरोगाश्च पापाद्वि विकृते जनाः॥२४॥
उपद्रुतं जगत् सर्व्वं तस्करैर्मूषिकैः खगैः।
पीड़िताश्च प्रजाः सर्व्वा देशभङ्गाः खरे प्रिये॥२५॥
सुभिक्षं क्षेममारोग्यं शस्यं भवति शोभनम्।
बहुक्षीरास्तथा गावो नन्दनं नन्दने प्रिये॥२६॥
अल्पतोयास्तथा मेघा वर्षन्ति खण्डमण्डले।
नश्यन्ति सर्व्वशस्यानि विजये नात्र संशयः॥२७॥
क्षत्रियाश्च तथा वैश्याः शूद्राश्च नटनर्त्तकाः।
पीड़िताস্তে वरारोहे जये सर्व्वे न संशयः॥२८॥
सरोगञ्च तथा देवि दाहज्वरसमन्वितम्।
अभिभूतं जगत् सर्व्वं मन्मथे सुरवन्दिते॥२९॥
तुषधान्यचयो देवि सर्व्वशस्यमहार्घता।
व्यवहाराश्च नश्यन्ति दुर्मुखे दुर्मुखाः प्रजाः॥३०॥
पीड्यन्ते सर्व्वशस्यानि देशे देशे शुचिस्मिते।
हेमलम्बे प्रजाः सर्व्वाः क्षीयन्ते नात्र संशयः॥३१॥
तस्करैः पार्थिवैश्चैव अभिभूतमिदं जगत्।
अर्घो भवति सामान्यो विलम्बे तु भयं महत्॥३२॥
विषमस्थं जगत् सर्व्वं विरोधे भयसंप्लवम्।
विकारी सर्व्वतोऽपायो मम वाक्यन्नान्यथा॥३३॥
क्वचिद्वर्षति पर्ज्जन्यो देशे संछिन्नमण्डलः।
दुर्भिक्षं शर्व्वरीवर्षे व्यवहारो विपर्य्ययः॥३४॥